

# पञ्चमः पाठः


# संख्यागणना ननु सरला





एकः सूर्यः चन्द्रोऽप्येकः
मानवकुलमप्येकम्।
द्वे नयने ननु जीविनि सकले
प्रभवति सर्वो द्रष्टुम्॥





लोकशङ्करस्त्रिनयनमूर्तिः
नमाम्यहं तं प्रतिदिवसम्।
चतुर्मुखोऽयं जगतः स्रष्टा
तेन हि सृष्टं जीवकुलम्॥





पञ्चाङ्गुलयो मम करकमले
लोके विदधति गणनाम्।
सुरसेनानीः षण्मुखदेवः
सततं पात्वयममरगणम्॥







सप्त वासराः सप्ताहे ननु
स्वराः सुमधुराः सप्त।
ऊर्ध्वमधस्तात् लोकाः सप्त
ख्याता ऋषयः सप्त॥





© NCERT not to be republished



Reprint 2025-26




अष्ट दिग्गजा धरन्ति धरणीम्
उपकृतिशीला अतुलबलाः।
नव ग्रहा ननु विपुले गगने
चरन्ति सततं नियततया॥





गृहस्य दश दिशाः
पूर्वदिशा, पश्चिमदिशा,
उत्तरदिशा, दक्षिणदिशा,
ईशानदिशा, आग्नेयदिशा,
नैर्ऋत्यदिशा, वायव्यदिशा,
ऊर्ध्वम्, अधः



पूर्वाद्या दश दिशः प्रसिद्धाः
सङ्ख्यागणना ननु सरला।
गायामो वयममितामोदं
कुर्मो बहुधा करतालम्॥

*डॉ. जनार्दनहेगडे*

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| जीविनि | जीवे | प्राणी में | In the living being | |
| स्रष्टा | सृष्टिकर्ता ब्रह्मा | सृष्टिकर्ता ब्रह्मा | Creator of universe | |
| करकमले | हस्तारविन्दे | कमल जैसे हाथ में | In the lotus like hand | |
| विदधति | कुर्वन्ति | करते हैं | Facilitate | |
| गणनाम् | गणनम् | गिनती | Counting | |
| सुरसेनानीः | कार्तिकेयः | देवों के सेनापति (कार्तिकेय) | Commander-in-chief of Gods | |
| पाति | रक्षति | रक्षा करता है | Protects | |
| सप्ताहे | दिवससप्तके | सप्ताह में | In a week | |

© NCERT not to be republished





Reprint 2025-26

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| ऋषयः | मुनयः | ऋषि-गण | Sages | |
| ऊर्ध्वम् | उपरि | ऊपर | Above | |
| अधः | निम्नभागे | नीचे | Below | |
| उपकृतिशीलाः | उपकार-स्वभावाः | उपकार स्वभाववाले | Those who are of helpful nature | |
| अतुलबलाः | अतुल्यशक्ति-सम्पन्नाः | अतुलनीय बलवाले | Extraordinarily strong | |
| नियततया | नियमितरूपेण | नियमित रूप से | Continuously | |
| दिशः | दिशाः | दिशाएँ | Directions | |
| अमितामोदं | अत्यानन्दपूर्वकम् | अति आनन्दपूर्वक | With Great/ limitless delight | |
| करतालम् | करतलध्वनिः | ताली | Clap | |

Lesson-5

© NCERT not to be republished

## वयं संख्यां गणयामः (१ – ५०)

| | | | | |
|---|---|---|---|---|
| १ – एकम् | ११ – एकादश | २१ – एकविंशतिः | ३१ – एकत्रिंशत् | ४१ – एकचत्वारिंशत् |
| २ – द्वे | १२ – द्वादश | २२ – द्वाविंशतिः | ३२ – द्वात्रिंशत् | ४२ – द्विचत्वारिंशत् |
| ३ – त्रीणि | १३ – त्रयोदश | २३ – त्रयोविंशतिः | ३३ – त्रयस्त्रिंशत् | ४३ – त्रिचत्वारिंशत् |
| ४ – चत्वारि | १४ – चतुर्दश | २४ – चतुर्विंशतिः | ३४ – चतुस्त्रिंशत् | ४४ – चतुश्चत्वारिंशत् |
| ५ – पञ्च | १५ – पञ्चदश | २५ – पञ्चविंशतिः | ३५ – पञ्चत्रिंशत् | ४५ – पञ्चचत्वारिंशत् |
| ६ – षट् | १६ – षोडश | २६ – षड्विंशतिः | ३६ – षट्त्रिंशत् | ४६ – षट्चत्वारिंशत् |
| ७ – सप्त | १७ – सप्तदश | २७ – सप्तविंशतिः | ३७ – सप्तत्रिंशत् | ४७ – सप्तचत्वारिंशत् |
| ८ – अष्ट | १८ – अष्टादश | २८ – अष्टाविंशतिः | ३८ – अष्टात्रिंशत् | ४८ – अष्टचत्वारिंशत् |
| ९ – नव | १९ – नवदश | २९ – नवविंशतिः | ३९ – नवत्रिंशत् | ४९ – नवचत्वारिंशत् |
| १० – दश | २० – विंशतिः | ३० – त्रिंशत् | ४० – चत्वारिंशत् | ५० – पञ्चाशत् |



Reprint 2025-26

## वयम् अभ्यासं कुर्मः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु—**

(क) कः एकः अस्ति? – सूर्यः

(ख) कः षण्मुखदेवः अस्ति? – सुरसेनानी (कार्तिकेयः)

(ग) कः त्रिनयनमूर्तिः अस्ति? – शङ्करः

(घ) का सरला अस्ति? – संख्या गणना

(ङ) के अतुलबलाः सन्ति? – दिग्गजाः

**२. उदाहरणानुगुणं शब्दानां पुरतः उचितां संख्यां लिखन्तु—**

**यथा** – आकाशे ……१…… सूर्यः विभाति। (१, २, ३, ४)

(क) मम हस्ते ……५…… अङ्गुलयः सन्ति। (९, ५, ८, ७)

(ख) सप्ताहे ……७…… वासराः भवन्ति। (६, १०, ७, ५)

(ग) कार्तिकेयस्य ……६…… मुखानि सन्ति। (१, ६, १०, ३)

(घ) व्याकरणे ……३…… वचनानि सन्ति। (१०, ९, ३, ५)

(ङ) गगने ……९…… ग्रहाः सन्ति। (८, ७, ९, १०)

**३. उदाहरणानुसारं सङ्ख्यां सङ्ख्यापदं च लिखन्तु—**

**यथा** – भवतः परिवारे कति जनाः सन्ति? ……५……, (……पञ्च……)

(क) कति दिशः सन्ति? ……१०……, (……दश……)

(ख) सप्ताहे कति वासराः भवन्ति? ……७……, (……सप्त……)

(ग) वर्षे कति मासाः भवन्ति? ……१२……, (……द्वादश……)

(घ) भवतः कति दन्ताः सन्ति? ……३२……, (……द्वात्रिंशत्……)

(ङ) स्वराः कति भवन्ति? ……७……, (……सप्त……)

© NCERT not to be republished



Reprint 2025-26

४. **अधः प्रदत्तेन पदेन सह सङ्ख्यां योजयन्तु—**

| | अ | ब |
|---|---|---|
| (क) | पञ्च | २० |
| (ख) | एकम् | १३ |
| (ग) | अष्ट | ५ |
| (घ) | विंशतिः | १ |
| (ङ) | त्रयोदश | ८ |

५. **उपस्थितिपत्रं पश्यन्तु। संख्यां वदन्तु लिखन्तु च—**



| उपस्थिति-क्रमसंख्या | नाम |
|---|---|
| १ – एकम् | गणेशः |
| २ – द्वे | गीताञ्जलिः |
| ३ – त्रीणि | जगन्नाथः |
| ४ – चत्वारि | दिनेशः |
| ५ – पञ्च | प्रज्ञा |
| ६ – षट् | बलरामः |
| ७ – सप्त | मोहनः |
| ८ – अष्ट | राधिका |
| ९ – नव | सुभद्रा |
| १० – दश | स्वयंप्रभा |



© NCERT be republished


(क) गणेशस्य उपस्थितिसंख्या का? एकम्

(ख) सुभद्रायाः उपस्थितिसंख्या का? नव

(ग) स्वयंप्रभायाः उपस्थितिसंख्या का? दश


(घ) जगन्नाथस्य उपस्थितिसंख्या का? त्रीणि

(ङ) गणेशस्य उपस्थितिसंख्या का? एकम्





६. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे अङ्कैः च ताः संख्याः लिखन्तु—




७. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे शब्दैः च ताः संख्याः लिखन्तु—




© NCERT not to be republished



Reprint 2025-26

## योग्यताविस्तरः

### संख्याप्रसिद्धिः

एकम् – एकं ब्रह्म

द्वे – द्वे अयने (उत्तरायणम्, दक्षिणायनम्)

त्रीणि – त्रीणि वचनानि (एकवचनम्, द्विवचनम्, बहुवचनम्)

चत्वारि – चत्वारि युगानि (कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्)

पञ्च – पञ्च अङ्गानि (तिथिः, वासरः, नक्षत्रम्, योगः, करणम्)

षट् – षट् रसाः (मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)

सप्त – सप्त ऋषयः (मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः)

अष्ट – अष्ट दिक्पालाः ( इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः)

नव – नवग्रहाः (सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः)

दश – दश दिशाः (पूर्वदिशा, पश्चिमदिशा, उत्तरदिशा, दक्षिणदिशा, आग्नेयकोणः, नैर्ऋत्यकोणः, वायव्यकोणः, ईशानकोणः, ऊर्ध्वम्, अधः)

## कार्यकलापः

### संख्यागीतम्

एकं द्वे, एकं द्वे। पश्यत किमस्ति मम हस्ते।
त्रीणि चत्वारि, त्रीणि चत्वारि। हस्ते पात्रं, पात्रे वारि।
पञ्च षट्, पञ्च षट्। जम्बीररसं योजयत।
सप्त अष्ट, सप्त अष्ट। लवणं गुडं च मेलयत।
नव दश, नव दश। शनैः शनैः मन्थयत॥






Reprint 2025-26

## परियोजनाकार्यम्

चित्रे रिक्तस्थलेषु अङ्कैः संख्यां लिखन्तु—






Reprint 2025-26